ओ३म्

गुरुकुल-पत्रिका

[गुरुकुल कांगड़ी विश्वविद्यालयस्य मासिक पत्रिका]

पौष २०२४, दिसम्बर-जनवरी १९६७-६८, वर्षम् २०, अङ्कः ५, पूर्णाङ्कः २३३

श्रुति-सुधा

(ऋषिः—मेध्यातिथिः काण्व. । देवता—ऋभवः । छन्द.— १,२,६,७ गायत्री, ३ विराड् गायत्री, ४ निचृद् गायत्री, ५, ८ पिपीलिका मध्या निचृद् गायत्री

अयं देवाय जन्मने स्तोमो विप्रेभिरासया ।
अकारि रत्नधातमः ॥ ऋ० १।२०।१

(विप्रेभि) मेधावी ऋभुओं व ऋत से देदीप्यमान इन्द्रियों ने (देवाय जन्मने) दिव्य उत्पत्ति के लिए (अयं) यह (रत्नधातम. स्तोमः) अतिशय रूप में दिव्य रत्नों को धारण कराने वाला स्तोम अर्थात् ज्ञान समूह (आसया) अपने २ मुख से अर्थात् आन्तरिक मुख से (अकारि) निर्माण किया ।

इन्द्रियों का दिव्य रूप उस समय होता है जब कि वे अपने आन्तरिक मुख द्वारा प्रच्छन्न रूप मे निहित दिव्य गुह्य-ज्ञान को ग्रहण करती है । इन इन्द्रियों के दो मुख हैं; एक इन्द्रिय गोलक द्वारा बाह्य जगत् की ओर, और दूसरा ऋत समुद्र मे विद्यमान ब्रह्म-संवलित आन्तरिक वाक् की ओर । उस आन्तरिक समुद्र, में जब ऋतोदक भरता है, उस ऋत का पान कर ये इन्द्रियां ऋत से देदीप्यमान (ऋतेन भान्ति) होकर ऋभु नाम को चरितार्थ करती हैं । स्तोम समूह का वाचक है । रत्न अन्य मन्त्रों में २१ बताये हैं । अथर्व वेद के प्रथम मन्त्र के आधार पर ये ब्रह्माण्ड के २१ रूप हैं उनका ज्ञान होना ही रत्नों का धारण करना है ।

(गताङ्कतोऽग्रे)

देवतास्वरूपमीमांसा

मूललेखकः श्री अरविन्दः, अनु० श्री जगन्नाथो वेदालङ्कारः, अरविन्दाश्रमः, पाण्डिचेरी

त्रयोदशोऽध्यायः

द्वितीयमन्त्रपर्यन्तमृषिणा सोमस्य वर्णनं तस्य अपुरुषरूपा (भावरूपा) ऽभिव्यक्तित्वेन, मनुष्यस्य सचेतनानुभूतौ दिव्यसत्ताया आनन्दत्वेन विहितम्। अधुनाऽसौ वेदर्षीणां स्वभावानुसारं दिव्याभिव्यक्तेः परं दिव्यपुरुषवर्णने प्रवर्तते, तेन च तत्क्षणं सोमः परमपुरुषत्वेन, उच्च विराड् देवत्वेन प्रकटी भवति। अरूरुचद् **उषसः पृश्निरग्रियः**; परमोच्चः शबलश्च स **एकः** उषसो विभासयति। **उक्षा बिभर्त्ति भुवनानि वाजयुः**, समृद्धि कायमानोऽसौ वृषभः लोकान् धारयति। शबल वाचकः पृश्नि इति शब्दः **वृषभः** अर्थात् परम **पुरुषः**, गौश्चार्थात् स्त्रीभूत**शक्ति**श्चेत्युभयोरर्थे प्रयुज्यते। **श्वेतः, शुक्रः, हरिः हरित् कृष्ण हिरण्ययः** इति सकलरङ्गवाचिशब्दवत् 'पृश्नि' शब्दोऽपि वेदे प्रतीकात्मकः; **वर्णः** रङ्गो वा रहस्यवादिना भाषायां सदा गुण-स्वभावादिकं द्योतयति। चित्रविचित्रो **वृषभो** नाम निजाभिव्यक्तिवैविध्यविभूषितोऽनेकवर्णो देवः, सोम एव चासौ प्रथमः सर्वश्रेष्ठः कर्बुरो **वृषभः**, सम्भूतिमयलोकानामुत्पादकः, यतस्तस्मा**दानन्दात्** आनन्दमयादेकदेवादेव ते सर्वे प्रभवन्ति; **आनन्द** एव सत्तानां वैविध्यस्य जनकः। स **उक्षा**, 'उक्षन्' इति शब्दः स्वपर्यायवाची 'वृषन्' इति शब्द इव वर्षकः, उत्पादकः, वीर्यसेचकः, प्राचुर्यजनक **वृषभः, पुरुषः** इत्यर्थानभिधत्ते; स एव चेतनाशक्ति, **प्रकृति गां** वा उर्वरां करोति, स्वप्राचुर्यधारया च स लोकाञ्जयति धारयति च। स **उषसः**—प्रकाशस्योषसः, **सूर्यस्य** दीप्यमानगवां मातॄः—प्रकाशयति; स समृद्धिम् अर्थात् **सत्तायाः**, **शक्तेश्चैतन्यस्य** च पूर्णत्वं, देवत्वस्य बाहुल्यञ्च कामयते यत् खलु दिव्यानन्दस्य निबन्धनम्। अर्थात् आनन्दाधिपतिः सोम एव न **सत्यस्य** दीप्तीर्बृहतो विपुलसमृद्धीश्च प्रददाति यामिवयममृतत्वं प्राप्नुमः।

(तृतीय मन्त्रस्य पूर्वार्द्धम्)

सत्यं प्राप्तवन्तोऽस्माकं पितरः सोमस्य सर्जनशील ज्ञानं, तस्य मायाम् उपलेभिरे, परमदे**वस्य** तथा आदर्शया दिव्यमनीषया प्रज्ञाप्रधानचेतनया (मायया) च ते मनुष्ये **तस्य** प्रतिमां रचयाञ्चक्रिरे। **तैरसौ** मानवजातौ अजातशिशुत्वेन, मानवस्य देवत्वबीजरूपेण, मानवचेतनावरणान्निर्मोक्ष्यमाण**गर्भं (जन्म)** त्वेन प्रतिष्ठापयाञ्चक्रे, **मायाविनो ममिरे अस्य मायया, नृचक्षस पितरो गर्भमादधुः**। इमे पितरः खलु पूर्वे ऋषयो ये वैदिकरहस्यवादिना मार्गमन्विष्य लेभिरे, ये चाध्यात्मिकरूपेणाद्यापि विद्यमानाः, जातेर्भवितव्यताया अधिष्ठातारः, देवता इव च मनुष्ये तदमरत्वप्राप्तये कार्यं कुर्वन्तीति मन्यते इमे हि ते ऋषयः ये शक्तिशालिदिव्यदर्शनं सम्प्रापुः, **नृचक्षसः** तत्सत्यदर्शनमासादयामासुः येन ते पणिगोपित**गवां** मार्गणे, रोदस्योरर्थात् मनोमयान्नमयचैतन्ययोः सीमामुल्लङ्घयाति **चेतनस्य** बृहतः **सत्यस्यानन्दस्य** चाधिगमने समर्थाः बभूवुः (**ऋ.** १.३६.७; ४.१ १३-१८; ४.२. १५-१८ इत्यादिकमन्त्रा द्रष्टव्याः)। (*तृतीय मन्त्रः*)।

सोमो हि गन्धर्वः, आनन्दस्य चमूना**मधिपतिः**, स **देवस्य** सत्यं पदम्, आनन्दस्य पृष्ठं स्तरं वा रक्षति; **गन्धर्व इत्यापदमस्य रक्षति**। स परमोच्चः, सर्वाभ्योऽप्यन्यसत्ताभ्यः पृथक् प्रधानत्वेन

तासामुपरि च स्थितः, ताभ्यो भिन्नोऽद्भुतश्च, इत्थं सर्वोच्च सर्वातीतश्च, अर्थात् लोकेषु विद्यमानः किन्तु तानतिक्रान्तोऽसौ तेषु लोकेषु देवानां जन्मानि रक्षति, **पाति देवानां जनिमानि अद्भुतः।** "देवाना जनिमानि" इति सामान्योऽयं वाग्व्यवहारो वेदे। **अनेन** विश्वे दिव्यतत्त्वानामभिव्यक्ति विशेषतश्च मनुष्ये नानारूपैर्देवत्वनिर्मितिरभिप्रेयते। पूर्वमन्त्रे ऋषिस्तं **देवमेवमवर्णयत्** 'स खलु दिव्यशिशुर्यो जन्मलाभाय सञ्जीभवन्नास्ते,— अस्मिन् विश्वे मानवचैतन्ये च तिरोभूतस्तिष्ठति।' अत्र च स **तद्विषये इदमामनति** यत् स सर्वातीत। मनुष्यान्तर्निर्मितम् **आनन्द**लोक, दिव्यज्ञानेन तस्यान्तरुत्पन्नानि देवत्वरूपाणि **चासौ** शत्रूणा, विभाजनशक्तीनामसुखशक्तीनाञ्च (द्विषः, अरातिः) आक्रमणेभ्यो रक्षति, मिथ्यासान्धकारनिर्मायकज्ञानस्य अर्थात् अविद्याया मायाया वा रूपरचनाभिरुपेतादिव्यसैन्यगणाच्चापि (अदेवी माया) रक्षति।

यतोऽसाविमानाक्रामकशत्रून् आन्तरिकचेतनाया जाले बध्नाति; स विश्वसत्यस्य विश्वानुभवस्य च तस्या निधाया (व्यवस्थाया विन्यासस्य वा) अधिपतिर्या बाह्येन्द्रियस्थूलमनो निर्मितनिधापेक्षया गम्भीरतरा सत्यपरा च। अनयाऽऽन्तरनिधयैव सोऽनृतान्धकार**विभाजनानां शक्ती** निगृह्णाति, ताश्च सत्यप्रकाशैकत्वनियमस्य वश नयति; **गृभ्णाति रिपुं निधया निधापतिः।** अत एवास्या अन्त प्रकृतेः शासकेनानन्दाधिपेन रक्षिता जनाः स्वविचारान् स्वकार्याणि च आन्तरिकसत्यप्रकाशाभ्यां सह समस्वराणि कर्तुं प्रभवन्ति, ततः परञ्च ते बाह्यकुटिलतायाः शक्तिभिः प्रस्खलितपदा न भवन्ति, ते ऋजुपथमनुसरन्ति, स्वकर्मसु समग्रपूर्णत्वसमुपेताः सम्पद्यन्ते, अन्तःक्रियायाः बाह्यकर्मणश्चानेन सत्येन ते सत्तायाः समस्तमाधुर्यं, **मधु**, अन्तरात्मनो भोजनमानन्दमास्वादितुं योग्या जायन्ते। सुकृत्तमा मधुनो भक्षमाशत।

(चतुर्थो मन्त्रः)

सोमोऽत्र द्विधाऽभिव्यक्तो भवति—स हव्यं, दिव्यभोजनम्, आनन्दामृतत्वयो रसः, **हविः** वर्तते, **अथ** च तस्य दिव्यहविषोऽधिपतिर्देवोऽपि (हविष्मः)। ऊर्ध्वमपि सोऽभिव्यक्तः, तत्र स विशालं दिव्य सद्म विद्यते, **बृहत्**, अतिचेतनानन्दोऽतिचेतनसत्यञ्चास्ते यस्मात् सोमरसोऽवरोहत्यस्मान् प्रति। आनन्दस्य रसत्वेन स एतां यज्ञरूपमहायात्राम् (अध्वरम्)। अर्थादन्नमयस्तरादतिचेतनस्तरं प्रति **मानवस्य** प्रगतिं परित प्रवहति, तस्या प्रविशति च। स धूमलमाकाश, **नभः**, अर्थात् मनोमयतत्त्व स्वं वसनमावरणमिव च परिधार्यं स्तस्याध्वरस्य (यज्ञयात्राया) अन्तः प्रविशति, तं परिव्याप्नोति च। **हविर्हविष्मो महि सद्म दैव्यं, नभो वसान परि यासि अध्वरम्।** दिव्यानन्दो मानसानुभूते रूपाणां धूमलप्रकाशमयावरण धारयन्नस्मानुपैति।

तस्या यात्रायां तस्मिन् यज्ञियारोहणे वाऽयमानन्दमयदेवोऽस्माकं सर्वासामपि क्रियाणां **राजा** सजायते, अस्माक दिव्यीकृतप्रकृतेस्तस्याः शक्तीनाञ्च स्वामी सम्पद्यते, प्रकाशयुक्तं सचेतन हृदयञ्च स्वरथ कृत्वाऽनन्तामृतावस्थाया विपुलसमृद्धिमारोहति। **सूर्य** इव **अग्निरिव** वा जाज्वल्यमानशक्तिसहस्रेण परिवृतोऽसावन्तः प्रेरितसत्यस्य, अतिचेतनज्ञानस्य विशालप्रदेशान् विजयते; **राजा पवित्ररथो वाजमारुहः, सहस्रभृष्टिर्जयसि श्रवो बृहत्।** रूपकमिदं तस्य जित्वरस्य राज्ञो वर्तते य. शक्त्या तेजसा च सूर्यसदृश. यश्च विशालराज्यं सञ्जयति। यच्चासौ विजयते तत्किलामृतावस्थाया आधारभूतायां **विशालसत्यचेत नायां, श्रवः, मनुष्यार्थममृतत्वमेव।** मानवान्त-

निभृतः स देवस्तिमिरात् सान्ध्यप्रकाशाच्च निर्गत्य उषसस्तेजसां मार्गेण सौरसमृद्धीः प्रति समारोहन् स्वकीयं सत्यं धामैव विजयते, इत्था पदम् अस्य ।

(पञ्चमो मन्त्रः)

० ० ०

अनेन सूक्तेन सार्द्धमहमृग्वेदस्य विशिष्ट-सूक्तानामिमां लेखमालां समापयामि । अत्र ममोद्देश्यमिदमासीद् यद् यथार्थोदाहरणैर्वेदस्य रहस्यं स्पष्टीकुर्वन्नहं यथासम्भवः सङ्क्षेपेण वैदिकदेवतानां वास्तविकव्यापारान् निदर्शयेयम्, अपि च तासां पूजापद्धतेरभिव्यञ्जकप्रतीकानामाशयं, यज्ञस्य स्वरूपं लक्ष्यञ्च प्रतिपादयेयमिति । एतदर्थं मया साभिप्रायमेव कतिपयलघुसुगमसूक्तानि वृतानि, तानि च वर्जितानि यानि विचाररूपकयोर्नितरां हृदयग्राहिगाम्भीर्यं सौक्ष्म्यं जाटिल्यं च दधति,—एवमेव तान्यपि परिहृतानि येष्वाध्यात्मिकाशयः स्पष्टतः पूर्णतश्चोपरितले एव निहित आस्ते, तान्यपि च यानि निजात्यद्भुततागहनताद्वारा गुह्यपावनकाव्यात्मकं स्वं यथार्थस्वरूपं प्रकाशयन्ति । आशासे यदिमानि निदर्शनानि निष्पक्षमनसैषां स्वाध्यायं चिकीर्षवे पाठकायास्माकमस्य प्राचीनतम-परमोदात्त-काव्यस्य वास्तविकाशयं दर्शयितुमलमेतदपेक्षया सामान्यतरप्रकारकैरन्यैरनुवादैरिदं दर्शयिष्यते यदिमे विचारा न केवलं केषाञ्चिदेव ऋषीणामुच्चतमचिन्तनधाराः किन्तु ऋग्वेदे सर्वत्रापि व्याप्ता भावा शिक्षाश्च ।

॥ इति शम् ॥

(गतांकतोऽग्रे)

पाणिनेराचार्यस्य शब्दनित्यत्ववादः

[लेखक:–श्री जयदत्तः शास्त्री व्याकरणदर्शनाचार्य , वेदवेदांगमहाविद्यालय., जोशीमठः]

ननु यदि नित्या. शब्दास्तर्हि किमर्थम् आचार्यः "वृद्धिरादैच्" (१-१-१),मृजेर्वृद्धिः (७-२-११४) मार्ष्टि । "अस्तेर्भूः" (३-४-५२)-भविता, भवितुम्, भवितव्यम् । इको यणचि (६-१-७७)-दधि+आनय=दध्यानय । "हन्तेर्जः" (६-४-३६)-जहि । "णेरनिटि" (६-४-५१) आटिटि+अत्=अटिटत् "श्नसोरल्लोपः" (६-४-१११) -अस्+त =स्त, अस्×अन्ति=सन्ति । "अस्यतेस्थुक्" (७-४-१७) आस+अत्=आस्थत् ।"पतः पुम्"(७-४-१९)-अपत्–अम्=अपप्तम् । "छन्दसि निष्टर्क्यदेवहूय०"(३-१-१२३) निस्+कृत्+यम्=निष्टर्क्यम् । इत्यादिभिः सूत्रैर्वर्णसंज्ञाविकारलोपागमविपर्ययान् शास्ति, न यथावस्थितान् शब्दानेव पठेत् ? किञ्च, प्रकृतीनां धातुगणादिपाठेषु प्रत्ययागमानां चाष्टाध्याय्यादौ पाठः कैमर्थक्यादिति चेद् ब्रूमः ।

अस्योत्तरमपि स्वयं वार्तिकभाष्यकारावूचतुः । तद्यथा–"सिद्धं तु नित्यशब्दत्वात्"–सिद्धमेतत् । कथम् ? नित्यशब्दत्वात् । नित्याः शब्दाः, नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते, न च संज्ञया आदैचो भाव्यन्ते । यदि तर्हि नित्याः शब्दाः,किमर्थं शास्त्रमिति चेन्निवर्तकत्वात् सिद्धम्" – निवर्तकं शास्त्रम् । कथम् ? मृजिरस्यायविशेषेणोपदिष्टस्तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता । तत्रानेन निवृत्तिः क्रियते मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवतीति" । (महाभाष्यम् १-१-१-३) ।

अन्यत्राप्युक्तं महाभाष्ये–"युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात् ? न नित्येषु नाम शब्देषु कूटस्थैरविचालिभिवर्णैर्भवितव्यमनपायोपजनविकारिभिः । आगमश्च नामापूर्वः शब्दोपजनः ? बाढं युक्तम् । शब्दान्तरैरिह भवितव्यम् तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता । आदेशास्तर्हीमे भविष्यन्ति अनागमकानां सागमकाः । तत्कथम् ? सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः । एकदेशविकारे तु नित्यत्वं नोपपद्यते" । (महाभाष्यम्–१-१-१९-५)

अन्यच्च–"कार्यविपरिणामाद्वा सिद्धम्" अथवा कार्यविपरिणामात् सिद्धमेतत् । किमिदं कार्यविपरिणामादिति ? कार्या बुद्धिः सा विपरिणम्यते । . . . अस्तिरस्मायविशेषेणोपदिष्टः । तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता । सः "अस्तेर्भूः" इत्यनेनास्तिबुद्ध्या भवतिबुद्धिं प्रतिपद्यते । नित्य एव च स्वास्मिन् विषयेऽस्तिर्नित्यो भवतिश्च । बुद्धिस्त्वस्य विपरिणम्यते" । (महाभाष्यम् १-१-५६-८) इति ।

अपि च, "नित्याः शब्दाः । नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः" । (महाभाष्यम् १-१-२) इति ।

एभिः प्रमाणपटलैर्व्युत्पत्तीनां तात्पर्यं स्पष्टं विज्ञायते । वेदमपठत्-इत्यनयोः शब्दयोर्विषये विद्+घञ्+अम्, अट्+पठ+शप्+तिप् इत्येषा प्रकृतिप्रत्ययादिकल्पना बुद्धिभेदमात्रं न तु वास्तविकी[1] । उक्तञ्चात्राभियुक्तैः–"शास्त्रेषु प्रक्रियाभेदादविद्यैवोपवर्ण्यते" । (वाक्यपदीयम्) इति । वस्तुतः शब्दव्युत्पत्तिवादो बालानामुपलालनेव । इममेव विषयं विशदीकुर्वन्तोऽखण्डस्फोटवादिन आहु –"पदे न वर्णा विद्यन्ते, वर्णेष्ववयवा न च ।

१–द्रष्टव्यम्-"बुद्धिविपरिणाममात्रं स्थान्यादेशागमागमिभावद्वारेण क्रियते" । (कैयटोक्तिर्महाभाष्ये) इति ।

वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन "। इति । ननु कोऽयं स्फोटो नाम पदार्थः ।

उच्यते । स्फुटत्यर्थोऽस्मादिति स्फोटो नादाभिव्यङ्ग्यो नित्यः शब्दः । तत्र स्फोटनादयोर्नित्यकार्यरूपत्वं व्यङ्ग्यव्यञ्जकरूपत्वं च निगदितं भाष्यकारेण पस्पशाह्निके "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्या आविवेश" । इति वेदमन्त्रस्य व्याख्यानावसरे । तद्यथा–"द्वे शीर्षे" "द्वौ शब्दात्मानौ नित्यः कार्यश्चेति" । अपि च– "अथ गौरित्यत्र कः शब्दः" इत्यस्य प्रश्नस्य "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः" इत्युत्तरं दत्त्वा प्रत्याययितवान्–नादैरभिव्यक्तः शब्दोऽर्थं प्रत्याययति, स एव स्फोटो निगद्यते इति । विवृतं चैतत् भाष्ये कैयटेन–"वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति । वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । आनर्थक्ये तु प्रत्येकम्[१] । उत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् । अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढाना वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्तिविशेषप्रसंगात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापित[२] " । (महाभाष्यम् १-१-१) इति प्रघट्टकेन ।

सर्वदर्शनकारोऽप्याह– "किं वर्णाः समस्ता व्यस्ता वाऽर्थप्रत्ययं जनयन्ति ? नाद्यः, वर्णाना क्षणिकानां समूहासम्भवात् । नान्त्यः, व्यस्तवर्णेभ्योऽर्थप्रत्ययाऽसम्भवात् । न च व्यासससमासाभ्यामन्यः प्रकारः समस्तीति । तस्माद् वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिपत्तिः स स्फोटः" । (सर्वदर्शनसग्रहे पाणिनीयदर्शनम्) इति । स्पष्टार्थमेतत् । शुभं भूयात् ।

१–"समुदायस्य वाचकत्वमुपेयम्, तत्तु न युक्तमिति शेष "–इत्युद्योतटीकाया नागेशभट्टाचार्य. ।

२–"नादैराहितबीजायामन्त्येन ध्वनिना सह । आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्य्यते" । इति ।

—०—

मान्या. सम्पादकमहोदयाः, गुरुकुल-पत्रिका ।

भवद्भिः प्रहिता पत्रिका प्राप्ता । तत्र विवेचनपदवी नीता विषयपरिसराः सम्यग्ध्याताः । सरसरचनाकोटिमापन्ना भावभारनिचिताः कामनीयकं बिभ्राणाः प्रसन्ना अनेके प्रसंगाः समर्चिताः । कान्तसम्पादनहृतमानसः पत्रिकाया भूयो-भूयो मांगल्य कामये ।　　भवदीयः

अमरनाथ पाण्डेयः
अध्यक्ष : संस्कृत विभागः
काशी विद्यापीठ, वाराणसी-२

विनायकानामभिनन्दनम्

(प्रस्तोता--श्री आचार्यः नारायण शास्त्री कांकरः एम . ए ., विद्यालंकारः जयपुरम्-३)

चतुर्थ-निर्वाचन-संयुगेऽत्र,
जयश्रियं प्राप्य प्रशासनस्य ।
तत्तत्पदेषु प्रमुदा स्थितानां,
वि-नायकानामभिनन्दनं वः ॥१॥

धन्यं स्वराज्यं जनतान्त्रिकं तत्,
प्रजाजना आत्महिताय यत्र ।
निर्वाचितै र्योग्यजनैः स्वमध्यात्,
प्रशासते स्वानकुतोभया हि ॥२॥

विज्ञातमेतद् भवतां भवेद् यत्,
प्राप्तानुभूति र्जनता चिरेण ।
स्वकीय-भाग्यं भवदीय-हस्ते,
समर्प्य किञ्चित् सुखमीप्सतीति ॥३॥

सर्वानुकूलं भवताद् यदेव,
सुखं तदेवाऽभिहितं सुधीभिः ।
तस्माद् भवन्तो न तदाचरन्तु,
स्वप्नेऽपि जीवार्त्तिकरं भवेद् यत् ॥४॥

हे नेतृवर्य्या ! कटु सत्यमेतद्,
गतेषु वर्षेषु यदस्मदीये ।
प्रशासकीये खलु रीति-नीती,
किञ्चिन्न सिद्धे सुखदेऽनुकूले ॥५॥

महार्घता वै सुरसेव भीष्मा,
व्यात्तानना नोऽत्तुमुपद्रुताऽस्ति ।
त्रातुं ततो हा ! नहि दृश्यतेऽन्यः,
श्रीमन्त एवाऽत्र यतन्तु तावत् ॥६॥

शिक्षा न दीक्षा न तथैव भाषा,
भूषाऽपि हा हन्त ! न चास्ति वेश्या ।
खाद्यं च पेयं परकीयमेव,
सेव्यं यदा स्यात्, किमु वाच्यमत्र ? ॥७॥

स्वदेशितायां न हि प्रेम याव-
ज्जागर्ति जायेत कथं तदेतत् ?
स्वानेव तस्मादयि नेतृवर्य्या !
देशानुरागे समुदाहरन्तु ॥ ८ ॥

लोकोऽनुवर्त्ती नितरां प्रकृत्या,
महाजनानां भवतीति गीतम् ।
तस्याऽनुशिष्टावयि नेतृवर्य्या. !
श्रीमन्त एवाऽत्र परं प्रमाणम् ॥ ९ ॥

धर्मात् पृथङ् नो नृपनीतिरीक्ष्या,
यतस्तथेक्षा क्षतिदाऽस्त्यतीव ।
धर्मं पुरस्कृत्य हि राजनीत्या,
युधिष्ठिरोऽसौ विजयं सुलेभे ॥१०॥

प्राणैः स्वधर्मः परिरक्षणीय-
स्त्याज्योऽन्यधर्मश्च सहैव मान्यः ।
एषैव रीतिः खलु लाभदाऽस्ति,
भयावहो रे ! परधर्म उक्तः ॥११॥

रामस्य राज्ये न हि कश्चिदासीत्,
क्षुधी तृषी वा गदवान् वियोगी ।
निराश्रयो निन्दितकर्मकारी,
नग्नो दरिद्रोऽप्यनवाप्त-विद्यः ॥१२॥

प्रजाजनानामनुरञ्जनेन,
त्यागैकवृत्त्याऽप्रतिमो मनस्वी ।
श्रीरामचन्द्रो मनुमार्गयायी,
मान्यो महीयानभवत् सुशास्ता ॥१३॥

श्रीरामराज्यं सुखदं स्वतन्त्रे,
देशेऽस्मदीयेऽपि ववाञ्छ गान्धी ।
हा ! किन्तु सोऽयं समयात् पुरैव,
दुर्दैवतो नः समभूद् विविष्ठः ॥१४॥

तस्माज्जनानां प्रियनेतृवर्य्याः!
प्राप्ताधिकाराः परिपूर्णशक्त्या ।
महात्मनोऽमुष्य भवन्त एव,
स्वप्नानिदानीं चरितार्थयन्तु ॥१५॥

गवां सुरक्षाऽस्तु कृषिप्रधाने,
देशेऽस्मदीये हि समृद्धिदात्री ।
तुष्टिं च पुष्टिं परिलभ्य लोका:,
स्वातन्त्र्य-सौख्यं सरसं स्वदन्ताम् ॥१६॥

बुद्धस्य वीरस्य जनिप्रदेशे,
न प्राणि-हिंसा भवतात् कदापि ।
अशोकचक्रं कुरुतादशोकं,
राष्ट्रध्वजे नोऽङ्कितमार्यलोकम् ॥१७॥

भाषाविवादः कलहस्य मूलं,
देशैक्यनाशो सुचिरात् प्रवृत्तः ।
सर्वप्रियां संस्कृतमार्यभाषां,
प्रचार्य देश्यां तमिमं हरन्तु ॥१८॥

आङ्ग्लीं परित्यज्य विदेशभाषां,
देशैक्यहेतो निजप्रान्तभाषाः ।
सम्मानयन्तः सममेव तासा-
मेकां लिपिं तु प्रतिपादयन्तु ॥१९॥

समस्तभाषा–जननीं पुराणीं,
निलिम्पवाणीममरामधीत्य ।
सुता. सुराणाममृतं पिबन्तो,
यथेप्सितं शान्ति-सुखं लभन्ताम् ॥२०॥

तेजस्विन. स्याम वयं तथैव,
यथैव शत्रुर्निजमस्तकस्यो- ।
त्पातात् पुरैवाऽस्तु नियन्त्रणे,
नोऽथवा स्वयं स्तान्निजकर्मनष्ट. ॥२१॥

स्वपूर्वजानां चरितं स्मरन्तो,
प्रेमाऽऽवहन्तो निज-संस्कृतौ च ।
यथोद्धरेत् स्वां जनता, भवन्त-
स्तथाऽत्म–चारित्र्यमुदाहरन्तु ॥२२॥

देशोऽस्मदीयश्चटका सुवर्ण्या,
जगद्गुरुश्चापि पुरैष जातः ।
यथार्थनामाऽस्त्वधुनापि येन,
तथा प्रयासः सफलो विधेयः ॥२३॥

श्रीरामगञ्जे जयपत्तनस्य,
सुमेरुकर्णाऽध्वनि वासकृद् व. ।
करोति नारायणकांकरोऽयं,
हारार्पणं मञ्ज्वभिनन्दनेन ॥२४॥

विचार·सूत्रे ग्रथितोऽयमच्छ.,
पद–प्रसूनोत्कर-तार-हारः ।
प्रेम्णाऽर्पितः कण्ठगतो मनोहृत्,
सुशोभतां वोऽद्य प्रहर्षकाले ॥२५॥

पिबतौ कालिदासकौशलम्

(ले०——डा० मञ्जुलमयङ्कपन्तुलः वेदव्याकरणाध्यापक. विश्वभारती शान्तिनिकेतनम्

कालिदासेन धातवस्तु वहव. प्रयुक्ता:, किन्तु नेयता वात्सल्येन यावता पा धातु । पाधातुश्च कालिदासीये काव्ये सर्वत्रैव साधारणेऽसाधारणे-चार्थे सप्रयोगवैदग्ध्यं स्वैरमुपयुज्यते । संस्कृत-वाङ्मये चैष धातु सामान्येन निगरणमेव द्योत-यति । तथा च बंगभाषाया "खा" धातो', हिन्दी भाषायाश्च "बनाना" धातो प्रकृतिम-बिभ्राण:, प्रयोगे भिद्यते ।

बंग भाषाया 'खा' धातो: सामर्थ्यन्तु खाद्ये पानीये चोभयत्र अप्रतिहार्यम् । एकेनैव खाधातुना यथौदन खाद्यते तथैव जलमपि पीयते । एवमेव हिन्दीभाषाया: "बनाना" धातुरपि महीय: सामर्थ्यं बिभर्त्ति । तथा चैनेनैव एकेन "बनाना" धातुना, किमुत भोजनम्, किमुत कार्यम्, किमुत मान्द्यारोप:, सर्वमपि अप्रतिहतं साध्यते । यावत् संस्कृतभाषाया. पाधातु एकार्थनिष्ठ:, यस्य च प्रयोगोऽपि न तथा लक्ष्यते यथैनयो: द्वयो: भाषयो: उपरिर्चाचतयो: द्वयो: धात्वो: । कारणं विविक्तम् । संस्कृत-भाषाया. धात्वर्था: धातुनिष्ठा: न चास्यां भाषायां धातूनां दारिद्र्यं दृश्यते । इह तु एकैकस्य भावस्य वाहनमसंख्याता धातव । तदस्यां भाषायां प्रत्यर्थम् धातवो रूढा । तैश्च रूढै. धातुभि: क्रियार्था: प्रकाश्यन्ते । तथाविधेष्वेव रूढेषु धातुषु अन्यतम: पाधातु:, येन निगरणार्थ: प्रकाश्यते । धातूनां धात्वर्थविकारे अर्थान्तरे वा पर्यवसितौ नूनमुपसर्गा: कारणं भवेयु:, किन्तु अस्योत्सर्गस्य अपवाद इव कालिदास: "[1]पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्" इत्यमिधाय धातो: अर्था-न्तरपर्यवसितौ उपसर्गप्राधान्यं स्वयमेवापास्तवान् । कवे: अस्या उक्ते: आशय स्पष्टतरं वरीवर्ति । तत् इङ् धातो: अध्ययनार्थत्वं धातुनिष्ठेनैव अर्थेन सिद्धे, अध्ययनार्थप्रतिपत्तौ इङा सह अधेरुपसर्गस्य योजन व्यर्थम् । अमुयोक्त्या एतदपि प्रतीयते यत्कालिदास: स्वयमपि धातुनिष्ठ एवार्थे समुप-जातप्रत्यय आसीत् ।

अथ कालिदाससाहित्ये यत्र-यत्र पाधातु: सविशेषं प्रयुज्यते, तानि-तानि स्थलानि उप-परीक्षितुं शक्यन्ते ।

तत्र तावत् रघुवंशस्य प्रथमे सर्गे "पीता-म्भसि[2] पिबेरप" द्वितीये सर्गे "पपौ[3] निमेषालस-पक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम्" एका-दशे सर्गे "भिबतां[4] विलोचनै: पक्ष्मपातमपि वञ्चनां मन." कुमारसंभवस्य तृतीये सर्गे "मधु[5] द्विरेफ:कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमान:" चतुर्थे सर्गे[6] "रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी" सप्तमे सर्गे "तमेक[7] दृश्यं नयनै पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि" तत्रैव "पीत गुरोस्तद्वचनं[8] भवान्या" अष्टमे सर्गे च "ईश्वर[9] श्चक्षुषा चिरमुमामुखं पपौ" ऋतुसंहारस्य तृतीये सर्गे शरद्वर्णनप्रसंगे "मत्त-

१. रघुवंशे—१५ सर्ग:, ९ श्लोक:

२. श्लोक ८९
३. " १९
४. " ३६
५. " ३६
६. " ४४
७. " ६४
८. " ८४
९. " ८०

द्विरेफपरिपीत१०मधुप्रसेकः" चतुर्थे सर्गे च "वन्त११च्छदं-निपीतसारम्" इत्यादि, शाकुन्तलस्य प्रथमेऽङ्के च "करौ१२ व्याधुन्वत्याः पिबसि रति-सर्वस्वमधरम्" चतुर्थेऽङ्के "पातुन्न१३ प्रथम व्यवस्यति जलं युष्मास्वपीतेषु या" षष्ठेऽङ्के च "अक्लिष्ट१४बालतरुपल्लवलोभनीय पीतं मया सदयमेव रतोत्सवेषु" इत्यादि सप्तमेऽङ्के च "अर्ध-पीतस्तनं१५ मातुरामर्दक्लिष्टकेसरम्" मालविका-ग्निमित्रस्य द्वितीयेऽङ्के "बिन्दुक्षेपान्१६ पिपासुः परिसरति शिखी" तथैव मेघदूते "संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्" "प्रीतिस्निग्धैः जनपद-वधूलोचनैः पीयमानः" "तीरोपान्तस्तनितसुभगं पास्यसि स्वादु," "त्वन्निष्यन्दोच्छ्वसितवसुधा-गन्धसपर्करम्यः," "स्रोतो रन्ध्रध्वनितसुभगं दन्तिभिः पीयमान," "तस्याः पातुं सुरगज इव व्योम्नि" प्रभृति भूरिप्रयोगाः दृश्यन्ते ।

एतेषूद्धरणेषु निपीतपरिपीताभ्यामेव सोपसर्गः पाधातुर्दुर्लभः । निपीतपरिपीतशब्दयोरपि पाधातुः स्वार्थमेव प्रतिपादयति, तदुपसृष्टेऽपि धात्वर्थस्यैव प्राधान्यन्नोपसर्गस्य । भाष्यकर्त्तारः, टीकाकर्त्तारो वा यतरं ततरमर्थं द्रौपदीचीरवद्वर्द्धयेरन् नाम, न तेनास्माकीनोपपत्तिः कथमपि विहन्यते ।

अथ चेत् पाधातोः पूर्वसंकेतितः अर्थात् निगरणार्थप्रधानः अर्थः गृह्येत यश्च रूढः, तर्हि येषु स्थानेषु निगरणाप्राधान्येऽपि पाधातुः प्रयुक्तः, तत्र असम्बद्धार्थता कृच्छार्थप्रतिपत्तिश्चेति दोषौ आपद्येताम् । येषु-येषु स्थलेषु पाधातुना स्वार्थ एव व्यज्यते अर्थात् निगीर्यमाणवस्तुनः आदान द्योत्यते, तेषु तेषु पाधातुः स्वार्थपरत्वात् औचि-त्यमालम्बते इति स्वीकुरवाम ।

भूयश्च निगरणेतरार्थप्रतिपादकाः धातवः येषामनल्पीयसी सख्या, ते चेत् स्वार्थप्रतिपाद-कस्थलेभ्यो वियुज्येरंस्तर्हि सावकाशा भूत्वा व्यर्थं भवेयुः तथा चैकस्मिन्नर्थे रूढः पाधातुः अनवकाश स्यात् । तद्यत्र यत्र कविना पाधातुः स्वार्थपर अर्थात् निगरणार्थप्रधानः प्रयोग. कृतः, तत्र-तत्र दोषन्न पश्यामः । यथा "पीताम्भसि पिबेरपः," "मधु द्विरेफः कुसुमैकपात्रे पपौ," "रविपीतजला तपात्यये," "परिपीत मधुप्रसेक," "पिबति रतिसर्वस्वमधरम्," "पातुन्न प्रथम व्यवस्यति जलम्" "अक्लिष्टबालतरुपल्लवलोभनीय पीतं मया," "अर्धपीतस्तनम्," "बिन्दुक्षेपान् पिपासुः" प्रभृतिस्थलानि परिसंख्यातुं शक्यन्ते यत्र निग-रणार्थप्राधान्य साक्षाल्लक्ष्यते ।

किन्तु यत्र-यत्र पाधातोः रूढोऽर्थो न लभ्यते तथा चापरेषां धातूनां प्रतिपन्नैरर्थैः तदर्थप्रति-पत्तिर्जायते, तत्र-तत्र पाधातोः स्वार्थपर प्रयोगो नास्ति इति तद्दोषाय कल्पयेत । यथा—"पपौ निमेषालसपक्ष्मपक्तिरुपोषिताभ्यामिव लोचना-भ्याम्," "पिबतां विलोचनैः," "नयनैः पिबन्त्यो नार्यों न जग्मुर्विषयान्तराणि," "पीतं गुरोस्तद्वचनं भवान्या," "ईश्वरश्चक्षुषा चिरमुमामुखं पपौ," "संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्," "जनपदवधूलोचनैः पीयमानः," प्रभृति स्थलानि ।

एतेषु स्थलेषु पूर्वत्र पाधातौ तद्रूढ एवार्थः प्रसक्तः, अपरत्र चाऽप्रसक्तः इति द्योतयितुम् एकस्यचन टीकाकर्तुः अर्थप्रक्रियाः उपन्यस्यामहे ।

१०.	श्लोक	६
११.	"	१३
१२.	"	२२
१३.	"	६
१४.	"	२०
१५.	"	१४
१६.	"	१२

तत्र तावत् पण्डितमूर्द्धन्यैः मल्लिनाथसूरिभिः यावत् "पिताम्भसि पिबेरप पिब" इत्युक्तम् तावदेव "पपौ निमेषालसपक्ष्मपक्तिः" प्रभृति-श्लोकम् यथा उपोषितोऽतितृष्णया जलमधिक पिबति तद्वदतितृष्णयाऽधिक व्यलोकयदित्येव विशद व्याचख्ये। तथैव "पिबतां विलोचनैः" इति, अत्यास्थया पश्यताम् इति व्याख्यातम्। "नयनै पिबन्त्य" इत्यस्य ग्रतितृष्णया पश्यन्त्य, "पीत गुरोस्तद्वचनम्" इत्यस्य पीतम् अर्थात् अत्यादरेण शुश्राव "चिरमुमामुख पपौ" इत्यस्य तृष्णयाऽद्राक्षीत् प्रभृति व्याख्यान कृतम्। टीकाकाराणाम् एनया अर्थप्रक्रियया पाधातौ अप्रसिद्धार्थारोपेण सममेव रूढार्थतिरस्कारोऽपि प्रत्यक्षमवलोक्यते। यतो हि अम्भ पीयते तत् यतरेण कतरेण, ब्राह्मणेन गवा, हस्तिना, शुना, श्वपाकेन वा पातुं शक्येत। तथैव द्विरेको वा मधुमक्षिको वा प्रियामनुवर्त्तमान कुसुमैकपात्रे सहैव मधु पातुमर्हति। किन्तु लोचनाभ्यां कस्यापि रूपपान यथा सुदक्षिणया दिलीपस्य पीयते, विलोचनै राघवयो रूपपानं यथा पौरै पीयते नयनैः अन्यविषयव्यावर्त्तिरूपपान यथा यथा नारिभि पीयते, गुरो वचनपान यथा भवान्या पीतम्, ईश्वरस्य चक्षुषा उमामुखपानं, किमुत वारिदस्य सदेशपान, निगरणार्थाभावात् असम्भवमेव। अस्मादेव हेतोः व्याख्यातृभि तत्र तत्र तेषु तेषु स्थलेषु अतिशयार्थो भावितः।

अथाऽपि निगरणार्थऽप्राधान्ये "पपौ निमेषालसपक्ष्मपंक्तिः," "चिरमुमामुखं पपौ," प्रभृति स्थलेषु पाधातोः पपौ इति लिङन्तं परस्मैपदिक रूपं पाणिनिव्याकरणासम्मतं सत्, 'पपे' इत्यात्मनेपदिकं रूपमेव उपपादयेत्। माधवीयायां धातुवृत्तौ पाधातुः निगरणार्थकः स्वीकृतः तदनुसरता च "निगरणचलनार्थेभ्यश्च" इति पाणिनीयेन सूत्रेण निगरणार्थेभ्यो धातुभ्यः परस्मैपदविधानात् निगरणार्थाभावे पपौ इति रूपं सर्वथैवानुपपन्नं स्यात्।

अनया समीक्षया कालिदासस्य पाधातुप्रयोगविधौ दोषः समापतति।

किन्तु पाधातुरूपप्रकृत्यात्मकपदैकदेशेन "पपौ निमेषालसा" दिस्थले सुदक्षिणायाः दिलीपं प्रति अनुरागातिशयः, नायकैकनिष्ठा, दिलीपेऽप्यासीत् अनिर्वचनीयमनिन्द्यम् मनोहारि रूपमाधुर्य प्रभृत्यर्था. व्यज्यन्ते। तथा च टीकाकर्त्तु यथा उपोषित अतितृष्णया जलमधिक पिबति तद्वदतितृष्णयाऽधिकंव्यलोकयत् प्रभृति व्याख्यानमपि तृष्णातिशयव्यञ्जनयाऽनुमोद्यते तृष्णातिशयतया व्यलोकनम् रसोत्कर्षे हेतुः, स च पाधातुकर्तृक एव। तत् "ददर्श सा निर्निमेषदृष्टि" अथवा अन्येन केनापि पर्यायेण, तृष्णातिशयानुदयात् वाच्यार्थ एव विश्रान्त्या, न तथा रसातिशयाभिव्यक्तिः स्यात् यथा पा धातुना व्यङ्ग्यार्थप्रतीतौ पा धातुरपि जहत्स्वार्थो निगरणैकार्थादतिरिच्यते।

तथैव "ईश्वरश्चक्षुषा चिर"मित्यादि उपरिष्टादुद्धृते श्लोकार्द्धे, "अतितृष्णयाद्राक्षीत्" प्रभृत्यर्थव्यक्तौ पाधातुरूपप्रकृतेः प्राधान्यम्। उमायाः मुखमाधुर्यम् लोकोत्तरं, तदेवोत्कृष्टम्, तस्मिन् तारल्यारोप तथा च अत्युत्कर्षप्रयोजकं पाधातुना व्यज्यते। अतएवात्र, एवम्विधेषु वा स्थलेषु केनापि इतरेण चित्पर्यायेण सौन्दर्योत्कर्षव्यञ्जना तृष्णातिशयव्यञ्जना वा असंभवा असाध्या च ऋते पाधातोः।

एवमेव "पीतं गुरोस्तद्वचन भवान्या" अर्थात् अत्यादरेण शुश्राव, इत्येनस्मिन्नपिअर्थे, पाधातुरूपप्रकृत्यात्मकपदैकदेशस्य प्राधान्यम्, न तु क्तप्रत्ययस्य, येन गुरोः वचनोत्कर्षः उमायाः पितृनिष्ठातिशय प्रभृत्यर्थातिशयः स्फुटतरं व्यज्यते। एवमेव अन्यत्रापि यत्र पाधातुः प्रयुक्त., अतिशयार्थ उन्नेतुं शक्यते।

तदिद कालिदासस्यैव कौशलम्, यत् पाधातौ वाच्यव्यंग्यार्थौ युगपदेवादधत्, लोकोत्तरं चमत्कारममन्द जनयति। —०—

तावत्स्वराज्यं नहि लोकराज्यं

(वृत्त उपजातिः)

प्रा० हरिश्चन्द्र रेणापुरकरः एम. ए., शासकीयमहाविद्यालय. गुलबर्गा (मैसूरराज्य)

यावत्स्वकीया निजदेशभाषाः
प्रतिष्ठिता नैव भवन्ति लोके ।
विद्यालये न्यायगृहे तथैव
तावत्स्वराज्यं नहि लोकराज्यम् ॥१॥

राष्ट्रस्य भव्योन्नत-भालपट्टे
कलङ्करेखेव विराजमाना ।
आङ्ग्ली न यावन्निलयं प्रयाति
तावत्स्वराज्यं नहि लोकराज्यम् ॥२॥

अस्मद्वरिष्ठार्यसुसंस्कृतेर्या
संवाहिका संस्कृतदेववाणी ।
यावन्न मानार्हपदं प्रपन्ना
तावत्स्वराज्यं नहि लोकराज्यम् ॥३॥

रुद्र-प्रसूर्या दुहिता वसूना-१
मादित्यजामि हृर्यमृतस्य नाभिः ।
अघ्न्येति वेदैरभिगीयमाना
सर्वत्र देशे परिपूज्यमाना ॥४॥

मातेव दुग्धामृतपोषयित्री
दध्याज्यतक्रार्पण-तोषयित्री ।
राष्ट्रीयमानोच्छ्रित चिन्हभूता
दृढार्थतन्त्रस्य कशेरुभूता ॥५॥

प्राचीनभव्योज्ज्वलसभ्यताया
विवर्तनेषु भ्रमिकीलभूता ।
यावच्च गौर्हन्यत आर्यदेशे
तावत्स्वराज्यं नहि लोकराज्यम् ॥६॥

यावज्जना नैव भवन्ति सुस्था
प्रसन्नचित्ताः सुखशान्तियुक्ताः ।
अन्नेन पानेन च पूर्णतृप्ता
तावत्स्वराज्यं नहि लोकराज्यम् ॥७॥

यावत्समस्ता न जनाः सुविद्या
सुधार्मिका धैर्यधनाः सुवृत्ता ।
विवेकवन्तोऽपि च राष्ट्रभक्ताः
तावत्स्वराज्य नहि रामराज्यम् ॥८॥

स्वदेशधी दास्यनिदानभूता
प्रतीच्यवर्त्मानुविधायिशिक्षा ।
यावद्यथार्थं न भवेत्स्वतन्त्रा
तावत्स्वराज्यं नहि लोकराज्यम् ॥९॥

लोकाय लोकस्य च लोकचाल्यं
लोकैककल्याणधिया प्रवृत्तम् ।
आसेतु यावन्न भवेत्सुराज्य
तावत्स्वराज्यं नहि लोकराज्यम् ॥१०॥

खाद्यान्ननिर्माणविधौ स्वकीये
रक्षाविधावायुधनिर्मितौ च
यावत्स्वदेशोऽस्ति परावलम्बी
तावत्स्वराज्यं नहि लोकराज्यम् ॥११॥

यावन्न राष्ट्रं निजवीर्यगुप्तं
बाह्यान्तरद्वेष्टृसमूहरिक्तम् ।
चीनैश्च पाकैश्च भवत्यजिक्यं
तावत्स्वराज्यं नहि लोकराज्यम् ॥१२॥

---

१. ऋग्वेद ८-१०८-१५

साधना

श्रीसत्येन्द्र बाबुकृतसाधनाया अनुवादको महाकविरामकृष्णभट्ट. 'हिन्दुकालिज'–दिल्लीविश्वविद्यालय.'

बाणस्य गद्यमिव हृद्यमथानवद्यं
यस्य प्रभोः सहजसुन्दरमद्वितीयम् ।
लोकोपकारचतुर चरितं चकास्ति
श्रेयो ददातु भगवान्स गणाधिपो न ॥

(प्रथमो भागः) प्रथमः परिच्छेदः

अस्ति प्रसिद्धाद् आग्रानगरस्य दुर्गात्प्रवर्तमानो विशालो ग्वालियरमार्गो नाम कश्चिद्राजपथः । तत्र नातिदूरे विराजति बालुगञ्जनामा कोऽपि ग्रामः। तस्योपान्ते जागर्ति चाङ्गलानां सुन्दरः कश्चन सैन्यकटकः । अयमाङ्गल्यां केण्टोन्मेण्ट् इति व्यवह्रियते । निवसन्त्यत्र बालुगञ्जे तत्सैन्यकटककर्मकराः । तेषु भूयांसो वङ्गाभिजनाः । आसंश्चात्र केचिद्यवनानां गृहाः । तत्र ग्रामे चावात्सुः कतिपये निर्धना मध्यमवर्गाश्च हिन्दुस्थानीयाः ।

तस्मिन् काले तत्रत्येषु वेश्मसु द्वयोश्चिरात्र कोऽपि न्यवसत् । तयोरेकमेकभूमिकम् । तस्य पश्चादासीत्काचिदल्पा पदवी । तस्याः सम्मुखे च त्रिभूमिकमन्यच्छिलानिर्मितं बृहद् हर्म्यम् । जना अनयोरुभयोरपि द्वारे चिरात्कीलितकवाटे अद्राक्षुः । नास्तां ते जीर्णे । प्रत्युत बालुगञ्जस्य निकेतनेषु दर्शनीये अभूताम् । तेन यदि निवासार्थमन्येभ्यो भाटकेनादास्येताम्, तर्हि बहवोऽभ्यर्थिन आगमिष्यन् ।

तदा तु दश वा द्वादश वा हायनास्तयोः स्वामिनश्चुनीलालनाम्न आग्रानगरं परित्यज्य निर्गतवत । स क्व गत कुत्र वा निवसतीति न कोऽपि जानाति । स कालिघट्टमधिवसतीति ब्रुवन्ति कतिपये । तथाप्युभे भवने पिहितद्वारे कीलितकवाट चास्ताम् । स्वामिना च तयोर्भाटकेन परायत्ततां नयनाय न कोऽप्यादिष्टपूर्व., नापि पश्चात्पत्रद्वारा सन्दिष्ट । अतस्ते शून्ये एवावृतताम् । बाबुश्चुनीलालोऽप्याग्राभिजन एवासीत् । तदीयः कश्चनाग्रानगरेऽवर्तत महान् प्रासादः तमधिष्ठाय स्वकार्याण्यनुतिष्ठन् स कस्याञ्चिन्निशीथिन्यां संवृत्ते कस्मिंश्चिद्भयङ्करे व्यतिकरेऽपरेद्युरेव सर्वं परित्यज्य ततो निरगात् । तदाप्रभृत्येव न कस्यापि विदितः तस्य प्रवृत्तिः । गच्छता कालेन नगरे तस्य निवास एव जनानां स्मरणपथात्परिभ्रष्टः ।

चुनीलालस्यासीत्कश्चन पुत्रः । तस्मिन्नवतीर्णे विंशति शरदां चुनीलालस्य पत्नी दिवं याता । तत स स्त्रियमन्यां परिगृहीतवान् । सा चासीन्महिषीव मनोभवस्य सौन्दर्यसारसर्वस्वशेवधिः । द्वितीयविवाहान्मासत्रये ह्यसम्पूर्णे कदाचित्प्रभातायां शर्वर्यां तस्य पुत्रश्शयनमधिशयान एवं केनापि मारितोऽदृश्यत । तस्य शयनं तावद्रुधिरक्लिन्नमासीत् । शय्यागारं च शोणितस्रवन्तीप्रवाहेण परिप्लुतं जातम् ।

तदा तु चुनीलालस्य भार्या गेहे नासीत् । तस्यामेव रात्रावनेकलक्षार्घाणि वज्रालङ्कृतान्याभरणानि च चौरैरपहृतानि । आरक्षिकाश्चुनीलालस्य सहधर्मिण्या अन्वेषणाय बहुधा कृतप्रयत्ना अपि नाध्यगमन्साफल्यम् । कथमपि तत्पुत्रस्य घातुका नायान्ति स्म दृष्टिगोचरताम् । भयंकरं

तं व्यतिकरमवेक्ष्य चुनीलाल आगानगरं परिहाय क्वापि गतवान् । आरक्षिकैश्चैषा घटना विस्मृतप्रायाऽभूत् ।

तत प्रभृत्येव पूर्वोक्ते द्वे अपि भवने शून्ये पिहितकवाटे कीलिते चाभूताम् । एकदा तु दिवसस्य तृतीये प्रहरे काचिद् हिन्दुस्थानीया योषा-तिजागरूकतयेतस्ततो विक्षिपन्ती चक्षुषी तस्यैकभूमिकस्य भवनस्य पश्चाद्विद्यमानामल्पां पदवीं प्राविशत् । तस्यां वेलायां तस्या दर्शन न कस्यापि सम्भावनीयमासीत् स हि ज्येष्ठमास. । तत्राप्यागानगरम् । येषां तु तन्नगर परिचित ते शक्नुवन्ति वदितुं ग्रीष्मे मध्याह्ने द्वितीयतृतीययामयोः कीदृशश्चण्डिमा मार्तण्डगभस्तीनामिति । तादृशे दन्दह्यमाने ललाटन्तपे चातपे वास ऊर्णामय परिधाय गृहाद् बहिर्गन्तुं को नु प्रभवेत् ! प्रवधूतज्वलन शिखासम्प्लोषा आतपज्वाला समन्ताल्लोक प्रहरन्ति स्म । अतः स आतप आसीदुपमानबाह्य. । अत एव विनैव कारणं सा नारी कदाचिन्मां कोऽपीह प्रेक्षेतेति भयान्महता यत्नेन जागरूकतया च पदविन्यासं कृतवती । दृष्टिपथे च न क्वापि कोऽपि जन्तु सञ्चरति स्म ।

सा नारी तस्यैकभूमिकस्य भवनस्य गवाक्षकवाटस्थित कीलकमाकर्षत् । यतो न तत्कवाटोऽन्तः कीलितस्ततो झटिति स उद्घाटितोऽभूत् । सा च तमारुह्य गवाक्ष गृहस्यान्तः प्राविक्षत् ।

तस्मिन्वेश्मनि न कदापि जनावासः कस्यापि विदितोऽभ्यूहितो वा केनापि । तत्राञ्जसा विभूषिते कस्मिंश्चिदपवरके शोभनमञ्चोपरि विन्यस्ते क्षीरफेनपाण्डुरे शयने विधूतकेशपाशा निरतिशयरूपलावण्या काचन काञ्चनगौराङ्गी वरारोहाऽर्धनग्नावस्थायामासीच्छयाना । पश्यतां सा गाढनिद्रामुद्रितलोचनेव प्रतिभाषात् । अतो यद्यपर्युक्ता नारी सावधानं शनैश्शनै पदानि निदधती तत्राऽऽगात्, तदेयं रमणी न प्रत्यबोधि ।

सा पिशाचकल्पा स्त्री दूर्वादलेषु निलीनं कालभुजङ्गमिव स्ववस्त्रान्तरे निगूहितं निशितमाकृष्य निस्त्रिंशं हस्ते गृह्णती निश्शब्दलेश शनैश्शनै पदमादधाना तन्मञ्चस्यागत्य पार्श्वमतिष्ठत् । न कुत्रापि कोऽप्यासीत्प्राणी । दिक्षु सर्वासु च घोरा व्यराजत नीरवता ।

मञ्चस्य सविधे स्थिता सा निजदक्षिणमुष्टिना सुदृढं त्सरुं गृहीत्वोदनमयत्खड्गम् । तत्रैवान्तरे चेतदग्रहाभिमुखस्थे त्रिभूमिके मन्दिरे उपरिष्टाद्भूमावल्पप्रमाण कञ्चिदगवाक्षमुद्घाट्य कोऽपि मानवो जोषमितो दत्तदृष्टिरवलोकयति स्म ।

क्षणार्द्धेन तस्याः पिशाच्या शमनप्रहरणदेशीयः खड्गो रामाया उत्तुङ्गस्तनमण्डलाया विवृते वक्षस्यात्सरु निखन्येत । किन्तु पापनिश्चयरूक्षहृदयायास्तस्या राक्षस्या उन्नमितो हस्तो ह्यकस्मादेव जडीकृतश्चित्रार्पितारम्भ इवादृश्यत । यतः स सौधान्तरगवाक्षनिकटवर्ती मानव. क्षिप्रं तस्याः पृष्ठं लक्ष्यीकृत्याग्निगोलकममुञ्चत् ।

अग्निगोलकस्य विस्फूर्जथुसङ्काशो निर्घोषस्तां नीरवतामुद्वेल्लयन्निव चतसृष्वपि प्रतिस्वनितो दिक्षु । तस्मिन्नेव क्षणे गवाक्षश्रितो मानवः पिधाय तत्कवाट क्वाप्यन्तर्हित. । सापि पिशाची गोलकविस्फोटितपृष्ठा विकृतवदना न्यपतद्भूमितले । तस्याः कण्ठात्पुनर्नोदचरत्कोऽपि शब्दः ।

तस्यामल्पपदव्यां नासीन्नरः कोऽपि । किन्तु गृहस्यान्तरग्निनलिकानिघोषमाकर्ण्यैव प्रतिवेशिनस्तं लक्ष्यीकृत्य शतश आधावन् ।

द्वितीयः परिच्छेदः

जनेषु समन्तत आगत्य निपुणमवलोकयत्सु-भयोरपि सद्मनोद्वारि यथापूर्वं कीलकमुद्रिते अवृतताम् । तथाऽग्निगोलकस्य धूमस्तोमोऽल्पपदव्या उपरि प्रदक्षिणप्रसरं गगनतलमधिरोहति स्म । अग्निचूर्णस्य गन्धोऽप्युद्वेजयति स्म घ्राणेन्द्रियम् । तदा सामान्या महान्तश्च, बङ्गा यवना हिन्दुस्थानीया इत्येवमादयो नानाकुलोत्पन्ना मानवाः सस्त्रीका आबालवृद्धं तामल्पपदवीमभि प्रधावन्तः समायाताः ।

एकभूमिकगृहस्यापावृतमवलोक्य वातायनमेके तदभ्यरुक्षन् । अधिरुह्य चान्तरवेक्ष्य "हा हन्ते" त्याक्रोशन्तस्ततोऽधस्तात्पदवीं प्रापतन् । तेषु साहसिकाः केवलं वातायनमनुज्झन्तः, "अहो हत्या हत्या" इत्याक्रोशन् । ततो हत्योदन्तमाकर्ण्य जनसम्मर्दे समजायत महान्कोलाहलः । तेषामेके चारक्षिकानाकारयितुमधावन् ।

आसीन्निवारणबाबुर्नाम सैन्याहारकोष्ठाधिकारिषु कश्चिद् धुरीणः । बालुगञ्जे सर्वेऽपि तं बहु मन्यन्ते स्म । सोऽग्निनलिकाशब्दं श्रुत्वा जनसमूहञ्चालोक्य तत्रागतो हत्येति श्रुत्वा वार्तां "सर्वेऽपि गवाक्षादवतरन्तु । पश्यामस्तावत् किं संवृत्तम्" इत्यवोचत् ।

तदाज्ञामनु सर्वेऽपि तत्रस्था अवातरन् । ततो निवारणबाबुर्वातायनमारुह्य गृहान्तर्वीक्ष्य प्रतिनिवृत्तो "झटित्यारक्षिकशालां गत्वा स्त्रियोर्हत्यामन्तरेण प्रवृत्तिर्देया यावदारक्षिका नात्रागच्छन्ति तावन्न किमप्यस्माभिराचेष्टितव्यम् । असाधारणं किमपि कृत्यमत्र संवृत्तम् । अस्मिन्गेहेऽस्मन्मतेन न कोऽपि निवसति । इमे स्त्रियौ कथंकारं प्राविक्षतां गृहस्यान्तः ? केन च हते ? येनाग्निगोलको विमुक्तस्तेनैव भाव्यं हत्याकारिणा । सर्वेऽप्येकतोऽपसृत्य तिष्ठन्तु । आरक्षिका आयान्तु" इत्येवमाद्यचीकथत् ।

तदादेशेन सर्वेऽपसृत्य स्थिताः । जनकोलाहलं निशम्य त्रिचतुरा आरक्षिकाः प्रधावन्त आगमन् । तेषु द्वौ निवारणबाबुनाऽऽरक्षिकशालां वेगेन वार्ताहरणाय प्रेषितौ ।

मुहूर्तान्तरे चागमन्मामूद आलिखानो नामारक्षिकमुख्य । आगत्य च गवाक्षमारुह्य वेश्मान्तरालोक्य स्वानुचरानधिकारिणो "गच्छत, यूयं सर्वेऽपि गृहे एते परितः स्थित्वा प्रतिपालयते"-त्यादिश्य, "महाधिकारिमहाशयाः क्षिप्रमेवागमिष्यन्ति । तदागमनानन्तरं व्यवहारस्य विचारणा भविष्यती" त्यब्रवीत् ।

तदनु स परावृत्य जनसमूहं प्रति विकटवक्त्रभङ्ग्या "भ्रातरः, ईषदपसरत । किमर्थं कोलाहलं कुरुध्वे ? दण्डाघातमनुभविष्यथे" त्यतर्जयत । अस्याधिकारिण कर्मज्ञानमासीत्कुण्ठितम् । यतः स पूर्वं केवललेखक आसीत् । तथापि निर्भर्त्सने क्षुद्रभाषणे च परामावहन्नैपुणीम् तस्य वचने नियमानुज्झित्वा न किमप्यन्यच्छ्रोतव्यमासीत् । व्यवहारेषु किं करणीयमिति जघन्याधिकारिभिः पृष्टः स यथाशासनमनुष्ठीयतामित्येव वार वारमुत्तर-

मदात् । स्वातन्त्र्येण न किञ्चिदपि कार्यं कर्तुं तस्यासीत्सामर्थ्यम् । तथापि पिण्डितंमन्यत्वमन्यादृशम्, तदनुरूपं च नटनम् वचनशूरत्वमित्यादयस्तस्य सर्वविदिता आसन्गुणा । अतो जनाः स्वयं मिथस्तस्य पश्चाद्वदन्तोऽपहसन्ति स्म ।

जनसंमर्दोऽस्याधिकारिण आज्ञया नाभजद् ह्रासम् । अपि तु जना किंचिदिवापसृत्य स्थिता । एतावतानेहसाऽऽरक्षिकमहाधिकारी महाभागः केनापि वङ्गतरुणेन साकमागच्छत् । हस्तेन वेत्रयष्टिं परिवर्तयतस्तस्य विज्ञायेङ्गितमारक्षिका वेगेनागत्याल्पदव्यां सम्मिलितं जनस्तोमं पलायनपरायणमकार्षुः । ततः स महाधिकारी निवारणबाबुनाऽन्यैश्च समेतः श्रेष्ठिगृहस्यान्तः प्राविशत् । आत्मना च सहागतं युवानं गृहप्रवेशे सशयानं सम्बोध्य "मणिमहाभागाः किं कुर्वन्ति ? आगम्यतामन्त" रिति वदन्गृहमध्यादाह्वयत् । मणिमहाभागस्तु व्याकुलो भूत्वा दिक्षु विक्षिपन्कातरां दृष्टिं तूष्णीमविशदन्तः । अन्ते चलिखानोऽप्यन्तरगात् ।

मंचस्य पार्श्वे भूतले निपतिताऽऽसीत्काचन हिन्दुस्थानीया योषित् । सोऽधिकारी तामुरःस्पर्शेन परीक्ष्य "इयं गतप्राणा । अग्निगोलको हि पृष्ठं विदार्य हृदयपिण्डं निर्भिद्योरस्तो निर्गत" इत्यवादीत् । ततो मञ्चस्योपरि शयानां सुन्दरीं परीक्ष्य "नेयं हता, जीवति । शीघ्रमियमवश्यं चिकित्सालयं नेया । एतदेव प्रथममाचरणीयम् । पश्चादन्यत्सर्वम् । अधिकारिन्, द्रुतं दोलायानमानाययतु भवान" इत्यभाषत । तदनु खानमहाशयस्त्वरया गवाक्षाद् बहिरागत्य दोलाऽऽनयनाय प्राहिणोदारक्षिकौ ।

महाधिकारी तु तत्रेतरततः परिक्रामन् "केनापि वातायनमार्गायातेन अग्निनलिकया नारी प्रहृतेति प्रतिभाति । हस्ते गृहीत कौक्षेयको यथापूर्वमवस्थितस्तरुणीमारणाय समागतामेतां कथयतीत्युक्त्वा युवानं तमन्वयुङ्क्त "मणिमहाभागः, किं मन्यन्ते भवन्तः ?" इति । तदा स गम्भीरया मुखमुद्रया व्याहरत्"अतिदुष्करं मन्ये एतद्रहस्यनिर्भेदनम्" इति । तच्छ्रुत्वा तत्रत्यानां सर्वेषामपि युगपदेव चक्षूंषि मणिमहाशयस्य निपतितानि मुखे । पश्यतां मनसि मणिमहाभागस्य धिषणालेशोऽपि नास्तीति भाति स्म । यतः स नितरामाकुलितान्तःकरण इतस्ततो विक्षिपति स्म चक्षुः ।

महाधिकारी निवारणबाबुप्रभृतीनप्राक्षीच्छिष्टपरिवृढान्-"अपि नाम भवतां कोऽप्यभिजानातीमे स्त्रियौ" इति । तदा सर्वे स्वानभिज्ञानं सूचयन्तस्तिर्यक्छिरःकम्पमकार्षुः । अनया वेलया च समायाता दोला । महाधिकारी गृहस्यार्गलं भेदयित्वाऽन्तर्दोलानयनमाज्ञापयत् । ततः सर्वेऽपि सम्भूय तां तरुणीमुद्धृत्य दोलायां शाययित्वा क्षिप्रः चिकित्सालयं प्राहिण्वन् । पञ्चत्वं गतायास्तु शवं नार्या मरणान्तरपरीक्षार्थं प्रेषितम् । तदनु सोऽधिकारी गृहे लब्धानि वस्तूनि स्वकार्यालयं प्रति प्रेषणीयानीत्याज्ञाप्य बहिरगाद् गृहात् । मणिमहाशयस्तु तत्रैव गृहेऽवातिष्ठत; न बहिर्गतः ।

(शेषागामिन्यङ्के)

गुरुकुल-वन्दनम्

कवयिता—डॉ रुद्रदेव त्रिपाठी, संस्कृत विद्यापीठ, दिल्ली,

(अवन्तिकायाः प्राचीनसान्दीपनिगुरुकुलमभिलक्ष्य)

यत्र पोषं प्राप्य वितता भुवनमार्या संस्कृतिः,
स्फुरति तस्मै गुरुकुलाय स्वान्तसिक्ता मे नतिः ।
अर्घ्यपाद्याचमनमधुपर्कासनादिभिरन्वह,
स्वागतं क्रियतेऽतिथीनां स्मानिश ह्यपि निश्छलम्;
वेदघोषोऽश्रूयत प्रतिशिष्यवदन विश्वतो-
नैव लुञ्चनवञ्चनानां क्वाप्यवर्तत सस्थितिः ।
नासुरीसम्पत्सु मोहः, केवल धर्म-प्ररोहः,
ईश्वरार्पणमेव यत्राभूद् हृदः सर्वा कृतिः ॥
स्फुरति तस्मै गुरुकुलाय स्वान्तसिक्ता मे नतिः ।
प्रतिपदञ्चोच्चावचं श्रौतानि वा स्मार्तानि वा,
प्राचलन् बाधां विना सर्वत्र सत्कर्माणि वा;
नित्यमाघ्रियते स्म यद् वैतानिकः शुचिहोमधूमः,
नेतरेष्वनवद्यकर्म विना बभूव जना ! रतिः ।
यत्र नो परिदेवनाऽऽसीद्, नो भयं नहि वेदनाऽऽसीत्
पश्यति स्म न कोऽपि सेर्ष्यं वेदमार्गेऽभूद् धृतिः ॥
स्फुरति तस्मै गुरुकुलाय स्वान्तसिक्ता मे नतिः ।
रामकृष्णावपि यदीयं पूजयित्वा चरणयुगलं,
ज्ञातवन्तौ सर्वविद्यानां कलानां सारमखिलम्;
योगयुक् सान्दीपनिः स हि काश्यपः परमः सुधीः,
आवन्तिक यश उज्ज्वल चक्रे भृश भुवि गीष्पतिः ।
यत्प्रसादादेव गीता, कृष्णचन्द्रेणापि गीता,
यस्य वैदुष्यामृतादुदिता क्षितौ पुण्या मतिः ॥
स्फुरति तस्मै गुरुकुलाय स्वान्तसिक्ता मे नतिः ।
अगणितश्रुतिघोषगुञ्जितमञ्जसाञ्चितवैभवं,
पटुबटूनां चटुलरटनैरङ्कपातैरङ्कितम्;
तच्च शिक्षातीर्थमधुना भूय एवोन्नीयतां,
सर्वतो गुरुगौरवेण भवेद् यतस्तत्सङ्गतिः;
सर्वविषमुत्सृज्य वैरं, प्राणिनो न्यवसन् समेऽरम्;
तत्र भूयो भवतु भव्या ज्ञानसम्पदुपागतिः ॥
स्फुरति तस्मै गुरुकुलाय स्वान्तसिक्ता मे नतिः ।

—०—

एका पृच्छा

श्री डॉ रुद्रदेव त्रिपाठी, संस्कृत विद्यापीठ, दिल्ली,

कथं भविष्यति विना संस्कृतं संस्कृतिशीलो लोकः,
कियच्चिरं नः स्थाता प्राचां, गौरवजो निर्मोक. ?
कया वाहिता जगति निर्मला धारा वैदिकसंस्कृतेः,
कया दीपिता मनसि दीपिका तमोभावना-सम्भृते ?
कस्या दास्यमपास्य वयस्याः शस्यं प्रापि यशस्यं,
सर्वं जानाना अपि कस्माद् गर्ते पतिता विस्मृते ?
ऋते रवेः कथमपाभविष्यति निबिडस्तमसां शोकः,
नैव विद्यते समयोऽयं यत् प्राचीनाना गीते-
र्गानादेवाद्रियेत मानवः पन्थानं शुभरीतेः ?
अस्य समाजस्यास्ति साम्प्रत बाधिर्य श्रुतिविवरे,
तिरयत शीघ्रं तदस्य विज्ञास्त्यक्त्वा मति प्रतीते-
विना चक्रवाकी कथमार्या. ! सुखं लप्स्यते कोकः ?
पाणौ पाणिं दत्त्वा मौनं विबुधा ! न स्थातव्यं,
नास्ति वस्तु यन्निकटे स्वेषां यतस्ततस्तल्लातव्यम् ?
मृगपतिवदने नैव विशन्ति स्वयं जन्तवो भीता.,
कर्म तादृशं किमपि शाश्वतं स्वोन्नतये ध्यातव्यम् ?
जल्पित-कल्पित-भाषा-भावैः स्थास्यति नैवमिहौकः,
कथं भविष्यति विनासंस्कृतं संस्कृतिशीलो लोक ?

सम्पादकीय टिप्पण्यः

अहो ! दासता यातुधानी

देहदास्य न तावद्दु:खकरं यावन्मनोदास्य कष्टकर मनुष्यत्वस्य विध्वंसिक पातकम् । मन्ये ! यथाकथञ्चिच्छरीरदास्यान्मुक्ता वयं परं मानसिक-दासतायां भृशं निगडिता अद्यापि शिर उन्नमयितु न शक्ता । अहो ! महत् कष्टतरमेतद् दास्यम् । श्रूयते वृत्तपत्रेषु पठ्यते च यन्मद्रासप्रान्ते श्री राजगोपालाचार्याणा साभापत्ये हिन्दीभाषाया विरोधायाङ्ग्लभाषायाश्चानन्तकालपर्यन्त भारतभुवि स्थिरीकरणाय बहूना केवलमाकृतिमात्रेण भारतीयाना मनोदास्यपङ्के निमग्नाना सम्मेलन सञ्जातम् । तत्राङ्ग्लभाषापक्षं समाश्रित्य यद्विचारजात प्रकटीकृत तेनानुमीयते यदस्मिन् भूतले दासतायाः पराकाष्ठा भारतवर्ष एव विद्यते । श्री मुदालियरमहाभागेन त्वेतद् व्याहृत यत्–"भारतायेश्वरवरदान सैषाऽऽङ्ग्लभाषा" किमियमुक्तिर्दास्यत्वस्य पराकाष्ठानाभिव्यनक्ति ? किं जापानरूसफ्रांसादिदेशा आङ्ग्लभाषाविरहिता सभ्या शिक्षिता सुसंस्कृता न सन्ति ? रूसदेशेऽपिबह्व्य भाषा विद्यन्ते परं न तत्र भाषासमस्या दृश्यते श्रूयते च । महदाश्चर्यं नैकभाषाभिज्ञो देशमुखोऽपि स्वात्माभिमानशून्य इति तत्र प्रकटितविचाराणा पठनेनानुमीयतेऽस्माभि । किमसौ संस्कृतस्य पूर्णता सर्वगुणसम्पन्नतां न विजानाति ? माऽस्तु हिन्दी राष्ट्रभाषा संस्कृतं भवत्विति कुतो न व्याहृतं तेन ? अहो ! अद्यापि न मुञ्चत्यस्यान् दासता-यातुधानी । हिन्दी राष्ट्रभाषापदार्हेति सर्वप्रथम हिन्दीतरप्रान्तवास्तव्यै महात्मगान्धि सदृशलोकोत्तरपुरुषैरुद्घोषितम् । दक्षिणप्रान्तेषु चास्या प्रसाराय राष्ट्रभाषाप्रचारक नाम सस्थानमपि तै सस्थापितम् । तेनैवोद्देश्येन नैकभाषाभाषिभि सर्वप्रान्तीयनेतृभि सर्वसम्मत्या हिन्दीभाषामेव राष्ट्रभाषापदे प्रतिष्ठाप्य सविधानस्य निर्माण विहितम् । तदधुना हिन्दीभाषाया विरोधस्य किमौचित्यम् ? दासताया प्रतीकभूता विदेशीयाना भाषा तु शिरोधार्या पूज्या स्वकीया च पर स्वभ्रातॄणा भाषा हिन्दीभाषा परकीया जाता। अहो! राजनीतिज्ञानामेषा दुरभिसन्धि र्दु:स्वार्थभ्रष्टाचारादिदोषसमुत्था न जाने भारतीयसस्कृति भारत वा कुत्र गर्ते पातयिष्यति ? यावद् भारतीयाना मनोराज्ये लब्धप्रसरेयमाङ्ग्लभाषा स्वच्छन्दा नर्तनिष्यति तावत् कस्या अपि भारतीयभाषाया अभ्युत्थान धर्मसस्कृतिसंस्कृतान् प्रति प्रेम भारतीयेषु न कदापि जागरिष्यतीति विदांकुर्वन्तु राष्ट्रसमाजहितचिन्तका सुधिय ।

अत्रैतदपि विचारणीयं यद् राष्ट्रभाषाविषये न केवल मद्रासवास्तव्याना महान् दोष प्रत्युत हिन्दीप्रदेशाना शासनानि विशेषत उत्तरप्रदेशवास्तव्या गुप्तप्रमुखा. काग्रेसाधिपतय. २०वर्षपर्यन्त शासनमधिकुर्वन्तोऽपि हिन्दीभाषाया प्रसाराय शासनक्षेत्रे व्यवहाराय च न किञ्चिदप्यकुर्वन् न जाने कस्माद् भीता केन क्रीता वा अस्या भाषाया उपेक्षां व्यदधु । अस्मन्मतेऽधुनैतत् कर्तव्य यत् केन्द्रस्य दक्षिणोत्तरभारतयोश्च शासकै शिक्षाशास्त्रिभि विरोधिदलाना नेतृभिश्च सह सम्मिल्य भाषाविषयकमेतादृश सर्वसम्मत समाधानमन्वेषणीय येनाङ्ग्लभाषाया आधिपत्यं व्यपगच्छेत् ।

★

साहित्य-समीक्षा

क. जाति-अन्वेष (प्रथम भाग)
ख. क्षत्रियवंश प्रदीपः (द्वितीय भाग)

लेखक—श्रोत्रिय श्री प. छोटेलाल शर्मा, M R A.S. प्रकाशक—मैनेजर वर्णव्यवस्था मण्डल, डा. कुलेरा जि० जयपुर, (राजस्थान), पृष्ठ सख्या ४६८, मूल्यम् ८.२५।

श्रीमता श्रोत्रियछोटेलालशर्मणा विद्वद्वरेण प्रणीतेऽस्मिन् जाति-अन्वेषण' नामके ग्रन्थरत्ने ब्राह्मणादिजातिसमूहमाधिकृत्य प्रदर्शिता. सर्वा अपि विविधा जातय श्रोत्रियमहाभागाना घोर-परिश्रम ससूचयन्ति। चतुर्षु वर्णेषु विभक्ता याऽऽर्य-जाति भूमण्डले सर्वोच्चस्थानमधिगताऽऽसीत् सा विच्छिद्य विच्छिद्य स्वस्थानात् परिभ्रष्टा। यश्च वैदिकधर्म समस्ते भूमण्डले प्रसृतोऽनादिकाला-दारभ्यैकोऽद्वितीय शक्तिसम्पन्नः सर्वोत्थानपरा-यणश्चासीत् स स्वोद्देश्यात् प्रच्युति गतः। त्रिचतुर-सहस्रवर्षाधिककालात् पूर्वमेव स्वस्ववर्णोचितगुण-कर्मादीना परित्यागात् वर्णसकरतामुपागता भ्रष्टा-चार दुराचारधनलोभमानादिदुर्गुणाना प्रवेशात्, वेदाध्ययनविमुखाना ब्राह्मणब्रुवाणामसत्क्रिया-प्राबल्यात् तत्तद्गुणकर्मविहीनजन्मजात्युपजा-त्याद्यनेकभेदभिन्ना सती सैषाऽऽर्यजाति पूर्व यवनानामधुना क्रिश्चियनानाञ्च पाशे निगडिता क्षीणतामवाप्ता। किन्तु महद् दु खास्पदमिद यदतीवसकीर्णचित्ता अस्पृश्यताघृणाऽसूयाद्वेषस्वार्थ-दम्भदुरभिमानादिभावभरिता हिन्दवोऽद्यापि न मुञ्चन्ति मोहमयी निद्राम्। आर्यजातेरिमा दुर-वस्थामभिवीक्ष्यानेकैर्महापुरुषैरस्या उत्थानाय बहुश. प्रयतितम्। परं स्व. श्री प. छोटेलाल शर्मण. कार्यं तु सर्वेभ्यो विलक्षणं घोरपरिश्रमेणा-र्थस्य बहुव्ययेन च संसाध्यं प्रतीयते। आर्यजातेर-वतसभूताना महर्षिमुख्याना ब्राह्मणक्षत्रियादिवर्णा. कथ बहुजात्युपजातिषु विभक्ता. भारतवर्षस्य कस्मिन् कस्मिन् प्रदेशे केन केन नाम्ना प्रोच्यन्ते, तेषा नामपरिवर्तन कथ सञ्जात, महीरुहस्य नैकशाखावन् मूलाद् विमज्य कथ ते प्ररूढा., कथं ते विधर्मिणो जाता इति सर्व सामग्री सकलन भारतवर्षस्य प्रतिकोण ग्राम ग्राम स्व. श्री छोटे-लालशर्मणा विहितम्। तदेतन्महत् कार्य विनाऽग्नि-संधुक्षण न सम्भवति। स्व. श्री छोटेलालशर्मणा प्रारब्धमिद कार्य तदैव साफल्यमेष्यति यदा स्व-स्रोतस पृथग्भूता क्षुद्रा जातयो विधर्मिणो वा शुद्धिव्यवस्थया पुन स्वस्रोतसि निमग्ना भवि-ष्यन्ति।

आर्यसामाजिका सम्यग् विचारयन्तु यल्लेख-कस्य 'क्षत्रियवश प्रदीप' नामके ग्रन्थे प्रोच्चारिते यमुक्तिर्गतार्था भविष्यति न वा। यथा—'गुणी के गुण को कह देना भी हम अपना कर्तव्य समझते हैं, उनकी हमारी सिद्धान्तीय भिन्नता को हम एक ओर रखकर कह सकते हैं कि हिन्दू जाति का उद्धार यदि होगा तो आर्यसमाज के द्वारा ही होगा।"

एवमन्यान्यपि लेखकमहोदयस्य पुस्तकानि सन्ति। अस्माकमयमभिलाषो विद्यते यद्धिन्दुजातेः समुद्धाराय तत्सम्बन्धीनि सर्वाणि पुस्तकानि संगृह्य सर्वै. पठनीयानि। वय लेखकमहोदयस्य पुस्त-काना प्रभूत प्रचारं वाञ्छाम.।

—भगवद्दत्तो वेदालंकारः।

★

गीत

रचयिता– श्री शंकरसिंह वेदालंकार

जगत में मेरी जय जय है। किन्तु क्या सच्चा परिचय है।।

सदा परछिद्र देखता रहा।
न मीठा बोला, कड़ुवा कहा।।
जहा बैठा, निन्दा रस बहा।
वनी वर वृत्ति सर्व सहा।।

प्रगति का कैसा अतिशय है?
जगत मे मेरी जय जय है।।

बना निज कीर्ति गान का कीर।
न अनुभव की रत्ती भर पीर।।
वताया अपने को ही वीर।
न फेंकी कृष्णा चादर चीर।।

भरा उर मे पापी लय है।
जगत में मेरी जय जय है।।

क्या न मै ही सच्चा बक सन्त।
साधु बाहर से, हृदय असन्त।।
किया करता नित पाप अनन्त।
काक सा उड़ूं वृन्त से वृन्त।।

पतित होने में संशय है।
जगत मे मेरी जय जय है।।

दिया मैने ऐसा विश्वास।
न जिसमें होता असत् विकाश।।
लगी बंधने शुचिता की आश।
पाप ने किया सभी का नाश।।

+सधस्थी होने में भय है।
जगत में मेरी जय जय है।।

लगा उठने मस्तक में धूम१।
कालिमा छाई उर में घूम।।
प्रेम की प्यारी चिता चूम।
उठ खड़ी हुई हृदय में धूम२।।

न जीवन में जब तन रय है। जगत में मेरी जय जय है।।

+ सामने स्थित होने वाला। १ धुंआ। २ हर्ष।

संस्मरण

कही हम इन्हे भूल न जाएं

गुरुकुल कांगड़ी को नयी मोड़ देने वाले—
हिन्दी पत्रकारिता के मूर्धन्य श्री इन्द्र विद्यावाचस्पति

लेखक:–श्री दीनानाथ सिद्धान्तालंकार, ६।६२५१, देव नगर, करौल बाग, नई दिल्ली–५

गुरुकुल विश्वविद्यालय कांगडी हरिद्वार गंगा पार से जिस समय इस संस्था के संस्थापक और आचार्य महात्मा मुंशीराम (बाद में स्वामी श्रद्धानन्द जी) के दोनों सुपुत्र श्री हरिश्चन्द्र जी और इन्द्र जी–प्रथम स्नातक के रूप में सन् १६१२ में निकले, उस समय मैं इसी गुरुकुल मे छठी या सातवीं कक्षा में पढता था। पं० इन्द्र जी ने कुछ वर्षो तक इसी संस्था में ही केवल जेब खर्च लेकर पढ़ाया और मुझे उनसे दर्शन, इतिहास, संस्कृत साहित्य इत्यादि विषय पढने का सौभाग्य मिला। इसके बाद १६२३ मे प्रारम्भ किये गये दैनिक "अर्जुन" में सहायक सम्पादक के रूप मे कुछ वर्ष तक काम करने का अवसर मिला। मैं सन् १६२४ जनवरी में इस दैनिक मे आया था। तब पण्डित जी को काफी निकटता से देखने का अवसर मिला।

पत्रकार पिता के पत्रकार पुत्र

उर्दू के गढ़ दिल्ली से सबसे प्रथम और प्रमुख हिन्दी दैनिक निकालने का श्रेय एकमात्र इन्द्र जी को ही है। पत्रकारिता की घुट्टी तो इन्हें जन्म से ही मिली थी। इनके पिता पूज्य महात्मा मुंशीराम जी पहले उर्दू में "सद्धर्म प्रचारक" साप्ताहिक जालन्धर से निकालते थे जो पंजाब के आर्य समाज आन्दोलन का मुख पत्र था। बाद में महात्मा जी ने एक रात में ही उसे बदलकर हिन्दी में कर दिया क्योंकि आर्य समाज का लक्ष्य हिन्दी प्रचार था। इसमें उन्हें काफी घाटा उठाना पडा। महात्मा जी ने अपनी जालन्धर स्थित विशाल कोठी, प्रेस, पत्र, सब कुछ आर्य प्रतिनिधि सभा पंजाब, को दान कर दिये। पत्र और प्रेस जालन्धर से गुरुकुल कांगडी आ गये। इन्द्र जी अपने छात्र काल मे ही हाथ से लिखी पत्रिका निकाला करते थे। "सद्धर्म प्रचारक" के गुरुकुल आ जाने के बाद वह इसमें "क्ष" उपनाम से लिखने लगे। इस प्रकार छात्र काल से ही आपको पत्रकारिता का शौक रहा।

दिल्ली से प्रथम हिन्दी दैनिक "विजय"

गुरुकुल के अध्ययन काल से मुक्त हो पण्डित जी ने दिल्ली को ही अपना कार्य क्षेत्र बनाया। "सद्धर्म प्रचारक" कुछ दिन पहले गुरुकुल से उठकर दिल्ली आ गया था और इसका सम्पादन इन्द्र जी के बडे भाई हरिश्चन्द्र जी करते थे। प्रथम महायुद्ध के दिन थे। हरिश्चन्द्र जी वृन्दावन के राजा महेन्द्र प्रताप के निजी सचिव बनकर विदेश चले गये और वहाँ गदर पार्टी मे शामिल हो गये। तब से कभी वापस भारत नही आये और बहुत गहरी और लम्बी कोशिशो के बावजूद उनका कोई विश्वासनीय पता-ठिकाना न मिल सका। बड़े भाई के जाते ही इन्द्र जी ने "प्रचारक" का सम्पादन संभाला। आपकी ज्यादा रुचि राजनीतिक क्षेत्र की ओर थी और यह पत्र धार्मीक था। इसलिए इसे अन्य हाथों में सौंप आपने "विजय" नाम से एक हिन्दी दैनिक निकाला।

यह सन् १९१९-२० की बात है। "विजय" उन दिनों खूब चमका। उन दिनों रोटरी तो क्या स्लैन्डर मशीने भी नही थी। हाथ से ही कम्पोज और हाथ से चलाई जाने वाली मशीनो पर ही छपाई, दूसरी ओर, ब्रिटिश सरकार की समाचार पत्रों–विशेषत देसी भाषाओं के–सिर पर कच्चे धागे मे लगातार टगी नगी तलवार रखी थी। इन सब विपरीत स्थितियो के बावजूद "विजय" की माग केवल दिल्ली में ही इतनी बढ़ी कि रात दिन मशीन चलने पर भी पूरी नही हो पाती थी। नया बाजार स्थित "विजय" कार्यालय के बाहर लोग घन्टों पत्र की प्रतिक्षा में खड़े रहते थे और जिस समय कुछ भी प्रतियां बाहर आतीं लोग ऐसे झपटते जैसे कटी हुई पतग पर बच्चे झपटते हैं। दिल्ली की नौकरशारी का आसन तो डांवाडोल हो गया। दिल्ली तब पजाब का हिस्सा ही समझी जाती थी। पजाब की उन दिनो की ओडवायर-शाही का प्रभाव दिल्ली पर पडे बिना कैसे रह सकता था। नौकरशाही के क्रूर हाथों ने अकाल में ही "विजय" का गला घोट दिया।

दैनिक 'अर्जुन' का आरम्भ

इसके बाद सन् १९२३ मे इन्द्र जी ने दिल्ली से ही "अर्जुन" दैनिक का प्रकाशन आरम्भ किया। इसका कार्यालय भी नया बाजार था। गांधी जी का सत्याग्रह आन्दोलन चोरी चौरा काण्ड के कारण धीमा पड़ गया था और उसके विपरीत जगह जगह साम्प्रदायिक झगडे बढ़ रहे थे। उत्तर-प्रदेश के आगरा-गुड़गांवा-मथुरा-अलीगढ इत्यादि जिलों में मलकाने राजपूतों की बड़ी संख्या थी। ये नाम मात्र के मुसलमान थे पर सब हिन्दू रीति रिवाजों का पालन करते थे। राजपूत महासभा ने इनकी शुद्धि का प्रस्ताव पास किया और इस कार्य को व्यवस्थित रूप देने के लिये, महासभा की प्रेरणा से स्वामी श्रद्धानन्द जी ने "शुद्धि सभा" कायम की। इससे पहले, वर्षों से मुसलिम संस्थाए इन मुसलमानों को इस्लाम मे समेट रही थी। "शुद्धि सभा" का कार्य केवल रक्षात्मक और जवाबी था। इस आन्दोलन के चलते ही मौलाना मुहम्मद अली, शौकत अली इत्यादि काग्रेसी मुसलमानो ने बड़ा शोर मचाया। गांधी जी, मोतीलाल नेहरू, देशबन्धु दास इत्यादि काग्रेसी नेताओं ने भी मुसलमानो का पक्ष लिया। स्वामी श्रद्धानन्द जी ने काग्रेस की इस मुसलिम तुष्टीकरण नीति का विरोध किया और काग्रेस से त्याग पत्र दे दिया। उस समय, मूलतः, हिन्दुओ के शुद्धि और सगठन आन्दोलन को पुष्ट करने के लिये स्वामी श्रद्धानन्द जी ने, कुछ समृद्ध व्यक्तियो की सहायता से उर्दू मे दैनिक "तेज" और हिन्दी मे "अर्जुन" दोनो पत्र निकाले। "तेज" का सम्पादन ला० देशबन्धु गुप्त और "अर्जुन" का प० इन्द्र जी को सौंपा गया।

जब मैं 'अर्जुन" में गया

१९२४ जनवरी मे जब मै अर्जुन मे आया तब उसका रूप काफी बदल चुका था। इन्द्र जी कठमुल्लापन के कट्टर विरोधी थे। उनमे राष्ट्रीयता कूट-कूट कर भरी हुई थी। धर्म को वह राष्ट्रीयता से पृथक् और दूसरे दर्जे पर समझते थे। शुद्धि और सगठन का भी वे राष्ट्रीयता की दृष्टि से, उचित सीमा तक ही, समर्थन करते थे। "अर्जुन" का यही दृष्टिकोण था। लगभग १।। साल तक मैं इस पत्र में रहा। घाटे के कारण बन्द हो जाने से मुझे भी १९२५ के

मध्य छोड़ना पड़ा।

इस पीढ़ी के हिन्दी पत्र-देश प्रेम की भावना से ही

